७अजमीढनृपपत्नीभेदे। "अजमीढोवरस्तेषां तस्मिन् वंशः प्रतिष्ठितः। षट् पुत्रान् सोऽभ्यजनयत् तिसृषु स्त्रीषु। भारत!। ऋक्षं धूमिन्यथो नीली दुष्मन्तपरमेष्ठिनौ। केशिन्यजनयज्जह्नु सुतौ व्रजनरूपिणौ" भा०आ०९४अ०। "अजमीढस्य केशिन्यां जज्ञे जह्नुः प्रतापवान्" हरिवं ३२अ०। ८उहोत्रनृपभार्य्यायाम् "सौहोत्रिरभवज्जह्नुः केशिन्या गर्भसम्भवः" हरिवं० २७अ०। ९सगरभार्य्याभेदे "द्वे भार्य्ये सगरस्यास्तां तपसा दग्धकिल्विषे। ज्येष्ठा विदर्भदुहिता केशिनी नाम विश्रुता। केशिन्यसूत सगरादसमञ्जसमात्मजम्" हरिवं०१६०। १०रावणमातरि कैकस्याम् "ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ। रावणः कुम्भकर्णश्च सर्व्वलोकोपतापनौ" भाग० ७।१।४।२। कैकस्या नामान्तरमिदम्

**केशी** स्त्री केश—गौरा० ङीष्। १नीलीवृक्षे राजनि० २भूतकेशीवृक्षे ३अजलोमावृक्षे रत्नमा०

**केशोच्चय** पु० ६त०। केशसमूहे हेमच०

**केश्य** त्रि० केशाय हितः यत्। १केशहितकारके तत्कार्य्योपादके २पदार्थे। "तिलोहि पाके मधुरोबलिष्ठः" इत्युपक्रमे "स्तन्योऽथ केश्योऽनिलहा गुरुश्च" "केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते" "केशप्रसादनी (काँकुइ) केश्या रजोजन्तुमलापहा" सुश्रु०। मधुररससेवनस्य केश्यत्वं तत्रोक्तं तदुपक्रमे "चक्षुष्यः केश्योवर्ण्य" इति सुश्रु० २कृष्णागुरुणि न० ३भृङ्गराजे पु० राजनि० तयोः केशहितत्वात् तथात्वम्। [विष्टतिः

**केसर** न० के जले सरति सृ-अच्। केशरशब्दार्थे तत्र

**केसरवर** न० केसरेण किञ्जल्केन वृणाति वृ—अच्। कुङ्कुमे। राजनि०।

**के(श)सराचल** पु० भूपद्मस्य केसरे स्थितः केशराकारतया वा स्थितः। सुमेरुपर्वते। तस्य च भूरूपपद्मस्य कर्णिकारूपेण मध्यस्थितत्वात् तथात्वं यथोक्तं विष्णु पु० "जम्बुद्वीपः समस्तानां द्वीपानां मध्यतः स्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः" इत्युपक्रमे "भूपद्मस्यास्य शैलोऽसौ कर्णिकासंमितः स्थितः। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पद्मानि लोकपद्मस्य मर्य्यादाश्चैव बाह्यतः" इति च विष्णु पु०। "सीता (नदी) तु ब्रह्मसदनात् केसराचलादिशिखरेभ्योऽधोऽधः स्रवन्ती" भाग० ५।७।८।

**केसराम्ल** पु० के जलनिमित्तं सरति अम्लो रसोऽस्य। वीजपूरके जम्बीरभेदे जटा०। दर्शनेनापि जिह्वाया रसनिःस्रावकत्वात्तस्य तथात्वम्।

**केसरिका** स्त्री के जले सरति साधुकारितया सृ—वुन् अलुक् स० टाप् अतइत्त्वम्। सहदेवीलतायां राजनि०।

**केसरिन्** पुंस्त्री केसरोऽस्त्यस्य इनि। १सिंहे २घोटके च अमरः "धनुर्द्धरं केसरिणं ददर्श" रघुः। स्त्रियां ङीप्। ३पुन्नागे ४नागकेसरे पु० मेदि०। ५रक्तशोभाञ्जने राजनि०। ६हनूमत्पितरि पु० (केशरिन्)शब्दे दृश्यम्

**केसरिसुत** पु० ६त०। हनूमति तत्कथा केशरिसुतशब्दे उक्ता केसरितनयादयोऽपि तत्रार्थे पु०। [ चकौ।

**कै** शब्दे भ्वा० पर० अक० अनिट्। कायति अकासीत्।

**कैंशुक** न० किंशुकस्येदम् "पुष्पफले बहुलम्" पा० बहुलग्रहणात् तस्य न लुक्। किंशुकपुष्पे "योषित् स्तन्यं शातकुम्भं विघृष्टं चौद्रोपेतं कैंशुकञ्चापि पुष्पम्" सुश्रु० लुपि तु किंशुकमित्येव तत्रार्थे न० [र्थे तच्छब्दे उदा०दृश्यम्

**कैकय** पु० त० स्वार्थेऽण् बा० न यादेरियादेशः। केकयशब्दा-

**कैकस** पु० कीकसमस्थि सारतयाऽस्त्यस्य प्रज्ञा० अण्। १राक्षसे स्त्रियां शार्ङ्गरवा० ङीन् कैकसी। सा च २सुमालिकन्याभेदे "राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिता कुम्भीनसी च इत्येताः सुमालेः प्रसवाः सुताः" रामा० उ० ६स०।सा च रावणादिमाता तत्कथा रामा०उ० ९स० "किं तु मां विद्धि ब्रह्मर्षे! शासनात् पितुरागताम्। कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि। स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह। विज्ञातं ते मया भद्रे! कारणं यन्मनोगतम्। सुताभिलाषो मत्तस्ते मत्तमातङ्गगामिनि!। दारुणायां तु वेलायां यस्मात् त्वं मामुपस्थिता। शृणु तस्मात् सुतान् भद्रे! यादृशान् जनयिष्यसि। दारुणान्दारुणाकारान्दारुणाभिजनप्रियान्। प्रसविष्यसि सुश्रोणि! राक्षसान् क्रूरकर्म्मणः। सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः। भगवन् नेदृशान् पुत्रांस्त्वत्तोऽहं ब्रह्मवादिनः। नेच्छामि सुदुराचारान् प्रसादं कर्तुमर्हसि। कन्यया त्वेवमुक्तस्तु विश्रवा मुनिपुङ्गवः। उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम्। पश्चिमो यस्तव सुतो भविष्यति शुभानने!। मम वंशानुरूपः स धर्म्मात्मा च न संशयः। एवमुक्ता तु सा कन्या राम! कालेन केनचित्। जनयामास बीभत्सं रक्षोरूपं सुदारुणम्। दशग्रीवं महादंष्ट्रं नीलाञ्जनचयोपमम्।